# शास्त्रपद्धतेः (कन्नडानुवादस्य) लोकार्पणम्

शास्त्रदृष्टेः विकासाय शास्त्रमार्गस्थानां सुखबोधाय च माननीयकुलपतिना (अन्ताराष्ट्रियसंस्कृतराजदूतेन) श्रीनिवासवरखेडीवर्येण सरलशैल्या संस्कृतेन च **शास्त्रपद्धतिः** इति ग्रन्थः लिखितः। ततस्ततः प्रादेशिकभाषाभिमानिनां सुखबोधाय संस्कृतलोकप्रियस्य अस्य ग्रन्थस्य हिन्दीभाषायां मराठीभाषायां कन्नडभाषायां च तद्भाषा-पण्डिताः अनुवादकार्यमकुर्वन्। कन्नडानुवादः यद्यपि जातः एव तथापि अनूदितग्रन्थस्यास्य औपचारिकलोकार्पणं कर्णाटकराजधान्यां सारस्वतसन्निधौ च सद्यः सुसम्पन्नम्। कन्नडभाषालेखनकर्मणि सिद्धहस्तः युवविद्वान् डा. विश्वनाथसुंकसाळमहोदयः (श्रीभारतीतीर्थपरिसरप्राध्यापकः) कन्नडानुवादं कृत्वा कन्नडिगानां सुखबोधाय भृशम् उपाकरोत् इति विज्ञाय सर्वे सभ्याः सन्तुष्टाः अभवन्। सभासदः अनुवादकं शुभाशयैरभ्यनन्दन्।




ग्रन्थस्य लोकार्पणं (11/03/2025) एस् व्यास विश्वविद्यालयस्य कुलपतिचरेण आचार्येण कोटेमने-रामचन्द्रभट्टर्येण विहितम्। कर्णाटकसंस्कृतविश्वविद्यालयस्य कुलपतिचरैः प्रो. मलेपुरं वेङ्कटेशवर्यैः ग्रन्थस्य परिचयः सभामुखं सम्पादितः। सभायाः आध्यक्ष्यं कर्णाटकविश्वविद्यालयस्य कुलपतिवर्यया डा. अहल्याशर्ममहोदयया निर्व्यूढम्। प्रो. शिवानीवर्या, पुस्तकस्य प्रकाशकसंस्थायाः शैलाजावर्या चात्र उपस्थिताः।




अधुना उत्कलभाषायां नेपालीभाषायां अन्यास्वपि भाषासु शास्त्रपद्धतेः अनुवादः जायमानः वर्तते इति विशेषः।

वर्षारम्भे राष्ट्रिययुवदिवससन्दर्भे शास्त्र-पद्धतिग्रन्थाधारिता राष्ट्रियसङ्गोष्ठी (११/०१/२०२५ तः १३/०१/२०२५ पर्यन्तम्) इदम्प्रथमतया राष्ट्रराजधान्याम् आयोजिता। अधुना (११/०३/२५) बेङ्गळूरुनगरे संस्कृतज्ञकन्नडिगानां शास्त्राभिमानिनां च भव्योपस्थितौ अनूदितग्रन्थस्य लोकार्पणं सञ्जातम् इत्यस्ति विशेषः। मूलग्रन्थकारः वरखेडीवर्यः चलद्विश्वविद्यालयोपमः (Walking University) इत्यतः यत्र यत्र सः याति तत्र सर्वत्र संस्कृतसुगन्धोपेतसमीरोऽपि वाति।

अस्मिन्नेव मासे हरिद्वारे प्रवर्तमाने शास्त्रोत्सवे (अखिलभारतीयशास्त्रीयस्पर्धासन्दर्भे - १८/०३/२५ तः २१/०३/२५ पर्यन्तम्) वरखेडीवर्यविरचितशास्त्रपद्धतिः (तृतीयं पुनर्मुद्रणम्) समेषां प्रातिभानां करगता भविष्यतीति सहर्षमुद्घोषयामः। सन्दर्भेऽस्मिन् मूलग्रन्थकर्त्रे अनुवादकाय मञ्चस्थेभ्यः सर्वेभ्यः ज्येष्ठेभ्यः सभ्येभ्यश्च विद्वद्भ्यः धन्यवादान् व्याहरामः।




- **आचार्यः गणेशतिम्मण्णपण्डितः,**

संयुक्त-निदेशकः, प्रकाशनानुभागः, के.सं.वि.

- **श्रीशसमीरः के. एस्,** शोधसहायकः